**चतुर्थचरणम्, कार्यक्रमः 09**

**दशदिवसीय-ऑनलाइन-राष्ट्रिय-कार्यशाला**

# शोध में मात्रात्मक एवं गुणात्मक उपागम

**(Quantitative and Qualitative Approaches in Research )**

18-28 नवम्बर 2020 पर्यन्तम्

**संक्षिप्तप्रतिवेदनम्**

भारतसर्वकारस्य शिक्षामन्त्रालयस्य बहुआयामिपरियोजना-**पण्डितमदनमोहनमालवीयराष्ट्रियशिक्षकशिक्षणमिशनमित्यस्य** अन्तर्गतत्वेन स्थापितेन **नवदेहलीस्थश्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये शिक्षणाधिगमकेन्द्रेण** चतुर्थचरणस्य कार्यक्रमाणाम् **'शोध में मात्रात्मक एवं गुणात्मक उपागम'** इति विषये नवम-दशदिवसीयराष्ट्रियकार्यशालायाः आयोजनम् 2020 तमवर्षस्य नवम्बरमासस्य अष्टादशदिनाङ्कात् नवम्बरमासस्य अष्टविंशतिः दिनाङ्कं यावत् कृतम्। कार्यशालायाः मुख्योद्देश्यं प्रतिभागिनां मात्रात्मकगुणात्मकं च शोधाभिकल्पानां, विधीनां, प्रदत्तसंकलनां विश्लेषणे च अन्तर्दृष्टिः प्रदानम् तथा च शोधकौशलकुशलतानाम् च अभिवृद्धिः करणम्। ऑनलाइनकार्यशालायाः सञ्चालनं गूगलमीट इत्यस्य मञ्चे कृतम्। उद्घाटनसत्रस्य शुभारम्भः शिक्षणाधिगमकेन्द्रस्य परियोजनाध्यक्षया **प्रो. अमितापाण्डेयभारद्वाजमहोदयया** स्वागतभाषणं कार्यशालायाः सन्दर्भैः च कृतम्। तदनु **पद्मश्रीचमूकृष्णशास्त्रीमहोदयानां** (संस्थापकः, स्पीक-संस्कृत-मूमेन्ट) मुख्यातिथीनाम् सम्बोधनम्, अध्यक्षीयभाषणं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य माननीयानां कुलपतीनां **प्रो. रमेशकुमारपाण्डेयवर्याणां** च जातम्। **प्रो. के. भरतभूषणवर्येण** (सङ्कायप्रमुखः विभागाध्यक्षश्च) धन्यवादज्ञापनेन सत्रसम्पन्नम्। कार्यशालायाः क्रियान्वयनं विशेषरूपेण अभिकल्पितेषु 55 सत्रेषु कृतम्, तेषु उद्घाटन-प्रबोधन-एकोनत्रिंशतप्रदर्शनाधारिततकनीकी-ऑनलाइनमाकलन-प्रतिपुष्टि-दशस्वाभ्यास- दशप्रश्नोत्तरसत्रम्, अनुभवकथनसमापनादीनि सत्राणि जातानि। अन्तिमतिथिपर्यन्तं 226 प्रतिभागिनां पञ्जीकरणं प्राप्तम्, तेषु 203 कार्यशालायाम् आमन्त्रिताः, तथैव 174 प्रतिभागिभिः स्वीयं प्रतिभागस्य प्रतिपुष्टिः प्रदत्तः, परञ्च 140 **प्रतिभागिभिः** कार्यशाला कृताः, 34 प्रतिभागिनः व्यक्तिगतकारणेन प्रतिभागं कर्तुं न शक्तवन्तः। भारतस्य 22 राज्येभ्यः 03 केन्द्रशासितप्रदेशेभ्यः 139 प्रतिभागिनः तथा च एकः प्रतिभागिः साउदी-अरबतः आसीत्। 20 राज्येभ्यः प्रतिभागिनाम् आन्ध्रप्रदेशतः 05, असमतः 02, बिहारतः 05, गोवातः 02, गुजराततः 02, हरियाणातः 04, हिमाचलतः 01, झारखण्डतः 02, कर्नाटकतः 04, केरलतः 01, महाराष्ट्रतः 14, ओडिशातः 07, पंजाबतः 09, राजस्थानतः 12, तमिलनाडुतः 02, तेलंगानातः 01, त्रिपुरातः 01, उत्तरप्रदेशतः 34, उत्तराखण्डतः 07, पश्चिमबंगालतः 05, त्रीणि केन्द्रशासितप्रदेशेभ्यः अण्डमाननिकोबारतः 01, देहलीतः 17, चण्डीगढतः 01 च प्रतिभागिनः आसन्। कार्यशालाविषये निष्णातानां देशस्य प्रतिष्ठितसंस्थानानाम् **एकोनविंशतिविशेषज्ञानां** कुशलमार्गदर्शने जातम्। एतेषु सत्रेषु कार्यशालायाः मुख्यविषयाः आसन् ते यथा- शैक्षिकशोध-मात्रात्मक एवं गुणात्मकोपागमः, शोधसमस्या परिकल्पनानिरूपणं च, शोधप्रक्रियायां सोपानानि, सम्बद्धसाहित्यपुनर्निरीक्षणं एवं डिजिटलतकनीकीद्वारा, शोधविधयः - प्रायोगिककार्योत्तरम्, सर्वेक्षणं, वर्णनात्मकं, कथनात्मकं, प्रजातिकम्, ऐतिहासिकम्, मूल्याङ्कनं, दार्शनिकं, व्यष्टि-अध्ययनम्, ग्राउन्डेडसिद्धान्तः, प्रतिदर्श एवं प्रतिदर्शनविधयः, प्रदत्तसंकलनं विश्लेषणप्रविधयः च, शोधप्रतिवेदनं प्रस्तावलेखनं च। तकनीकीसत्राणां विषयेषु 05 **दत्तकार्याणि** प्रतिभागिनां प्रदत्ताः। ऑनलाइनपरीक्षणम् अपि प्रशासितम्, तेषु 55% प्रतिभागिनः 60 **प्रतिशतात्** अधिकान् अङ्कान् लब्धवन्तः। अन्ते विशेषज्ञानां प्रस्तुतव्याख्यानानां गुणवत्ताविषये ऑनलाइनप्रतिपुष्टिः चतुश्श्रेणीषु कृता। यथा- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकं** च प्राप्तम्। तथा च तेषां औसतम् 75% 22% 03% एवं 00% क्रमशः श्रेणीषु प्राप्तम्। अनेन साकं कार्यशालायाः सन्दर्भे ऑनलाइनप्रतिपुष्टिः 10 बिन्दूनां पञ्चश्रेण्यां प्राप्ता। यथा- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकम्, असंतोषजनकं** च। एतेषां 10 बिन्दूनां प्राप्तश्रेण्याम् औसतप्रतिशते 82% **उत्कृष्टम्,** 16% **अति-उत्तमम्,** 02% **उत्तमम्,** 00% **संतोषजनकं** च प्राप्तम्। समापनसत्रे परियोजनाध्यक्षया गणमान्यातिथीनां स्वागतं कार्यशालाप्रतिवेदनं च प्रस्तुतम्। तदनु **डॉ. शकीला टी. शमसु** (पूर्व. ओ.एसडी, (एनईपी), शिक्षामन्त्रालयः, भारतसर्वकारः) मुख्यातिथीनां सम्बोधनम्, अध्यक्षीयभाषणं माननीयानां **प्रो. रमेशकुमारपाण्डेयवर्याणां** (कुलपतिः, श्रीला.ब.शा.रा.सं.वि.वि., नवदेहली) च जातम्। शिक्षासङ्कायप्रमुखस्य धन्यवादज्ञापनेन कार्यशाला सम्पन्नतां गता। कार्यशालायाः समापनान्तरं सफलप्रतिभागिनां ई-चित्रावली ई-प्रमाणपत्राणि च मेलद्वारा सम्प्रेषितानि।